# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - आचार्य-१ ( Sem_2 )** **प्रश्नपत्र-२** **गुणाः - ७०**

**विषयः - पौरोहित्यम्** CC 4.2.4 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - १८-०४-२०१६** **सन्दर्भग्रन्थः - आह्निकसूत्रावलिः**

---

### युनिट-१

**प्रश्नः -१ कयोश्चिद् द्वयोः व्याख्या कार्या ।** **०८**

*(१) ऋषिच्छन्दादिः छान्दोगब्राह्मणम्- यो हि वार्पो विदितार्षेयच्छन्दोब्राह्मणविनियोगो ब्राह्मणेन मन्त्रेण याजयति अध्यापयति स्थाणुं गच्छति गर्त वा प्रतिपद्यते वा प्रमीयते पापीयान् भवति ।*

*(२) विण्मूत्रोत्सर्गविधिः पारस्करगृह्यसूत्रे तिष्ठन्न मूत्रपुरीषे कुर्यात् । स्वयं प्रशीर्णेन काष्ठेन गुरुं प्रमृजीत विकृतं वासोनाच्छादयीत ॥*

**प्रश्नः -२ द्वयोः टिप्पणी कार्या ।** **०८**

*(१) ब्रह्मकर्मविचारः ।* *(२) वेदप्रशंसा ।*

*(३) वेदाङ्गानि ।* *(४) षोडशसंस्काराः ।*

**प्रश्नः -३ चत्वारः प्रश्नाः समाधेयाः ।** **०४**

*(१) शौचे उपवीतधारणप्रकारः किदृशः ?*

*(२) दन्तधावनमन्त्रं लिखतु ।*

*(३) सूर्यप्रार्थनायाः श्लोकं लिखतु ।*

*(४) पुण्यश्लोकाः कति सन्ति ?*

*(५) ॐकारफलम् लिखतु ।*

### युनिट-२

**प्रश्नः -४ कयोश्चिद् द्वयोः व्याख्या कार्या ।** **०८**

*(१) कुण्डसंस्कारादिकर्म-पारस्करः-परिसमुह्योपलिप्योल्लिख्योद धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थ वदा-साद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यर्थवत् प्रोक्ष्य निरूप्याधिश्रित्य पर्यग्निं कुर्यात् ।*

*(२) काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे । स्वर्गापवर्गदात्रे च यज्ञेशाय नमोनमः ।*

**प्रश्नः -५ एकस्य उत्तरं लिखत ।** **०८**

*(१) नित्यदानप्रयोगः ।* *(२) मङ्गलपदार्थदर्शने- कात्यायनमतम् ।*

**प्रश्नः -६ चत्वारः प्रश्नाः समाधेयाः ।** **०४**

*(१) अग्निहोत्रफलं किम् ?*

*(२) अर्घ्यफलं किम् ?*

*(३) अभिवादनः कथं करणीयः ?*

*(४) स्नानं कति विधम् ?*

*(५) धान्यस्य कति प्रकाराः ?*

*(६) पूजायां के सामग्रयः भवन्ति ?*

**युनिट-३**

**प्रश्नः -७ द्वयोः श्लोकयोः व्याख्या कार्या । ०८**

*(१) खदिरश्च कदम्बश्च करवीर करञ्जकौ ॥*

*एतेकण्टकिनः पुण्याः क्षीरिणस्तु यशस्विनः ॥*

*(२) एकदेशं तु वेदस्य वेदाङ्गान्यथवा पुनः ।*

*योऽध्यापयति वृत्यर्थे उपाध्यायः स उच्यते ॥*

**प्रश्नः -८ एकस्य टिप्पणी कार्या । ०४**

*(१) कालविशेषे पूज्यदेवताः ।*

*(२) पञ्चायतनदेवतास्थापनविचारः ।*

**प्रश्नः -९ त्रयः प्रश्नाः समाधेयाः । ०३**

*(१) पञ्चोपचाराः के लिखन्तु ।*

*(२) पुरुषसूक्ते कति उपचारमन्त्राः सन्ति ?*

*(३) षडङ्गन्यासप्रयोगे न्यासस्य नामानि लिखन्तु ।*

*(४) मूर्तेः प्राणप्रतिष्ठा कथं भवति ?*

*(५) पूजारम्भे प्रथमतः कस्य पूजा भवति ?*

**युनिट-४**

**प्रश्नः -१० द्वयोः श्लोकयोः ससन्दर्भ व्याख्या कार्या । ०८**

*(१) प्रातःसायमुभेसन्ध्ये मन्देहानाम राक्षसाः ।*

*भक्षितुं सूर्यमिच्छन्ति कारणं श्रुतिनोदित्तम् ॥*

*(२) आगच्छवरदे देवि त्र्यक्षरेरुद्रवादिनि ।*

*वरदांत्र्यक्षरां साक्षाद् देवीमावाहयाम्यहम् ॥*

*(३) बलिकर्म स्वधा होमः स्वाध्यायोऽतिथिसत्क्रिया ?*

*भूतपित्रमरब्रह्म मनुष्याणां महामखाः ॥*

**प्रश्नः -११ एकस्य टिप्पणी कार्या । ०४**

*(१) पञ्चमहायज्ञफलम् ।* *(२) तर्पणप्रयोगः ।*

**प्रश्नः -१२ त्रयः प्रश्नाः समाधेयाः । ०३**

*(१) गृहस्थाश्रमधर्मप्रशंसां कुर्वन्तु ?* *(२) सन्ध्यायाः कति प्रकाराः स्पष्टयतु ।*

*(३) अम्बुप्राशने मन्त्रः कः स्पष्टयतु ।* *(४) पञ्चयज्ञानां नामानि लिखन्तु ।*

---------------------